दिषः” हितो० “समीक्ष्य कुलधर्म्मांश्च स्वधर्म्मं प्रतिपादयेत्” मनुः ।

प्र+सम्+प्रकर्षेण सम्यगीक्षणे । “सह सर्व्वाः समुत्पन्नाः प्रसमीक्ष्यापदोऽभ्यगम्” मनुः “कुलं ख्यातिञ्च वृत्तं च बुद्ध्वा तु प्रसमीक्ष्य च” भा० आ० ४३७४ श्लो० ।

**ईक्षण** न० ईक्ष–भावे ल्युट् । १ दर्शने । करणे ल्युट् । २ नेत्रे । तत्र दर्शने “खिन्नः कार्य्येक्षणे नृणाम्” मनुः नेत्रे । “अभिमुखे मयि संहृतमीक्षणम्” शकु०“सदा संरब्धनयनौ सदा चानिमिषेक्षणौ” भा० आ० २३ अ० । “इत्यद्रिशोभा प्रहितेक्षणेन” रघुः ।

**ईक्षणिक** त्रि० ईक्षणं हस्तरेखादीक्षणेन शुभाशुभदर्शनं शिल्पमस्य ठन् । शुभाशुभफलकथनोपजीविनि सामुद्रिके । स्त्रियां टाप् । “मङ्गलादेशवृत्ताश्च भद्राश्चेक्षणिकैः सह” मनुः

**ईक्षति** पु० ईक्ष–धात्वर्थनिर्द्देशे श्तिप् । ईक्षणे । “ईक्षतेर्नाशब्दम्” शा० सू० ।

**ईक्षा** स्त्री ईक्ष–भावे अ टाप् । ईक्षणे १दर्शने २पर्य्यालोचने च “स ईक्षां चक्रे” श्रुतिः “श्रवणादनु ईक्षा अन्वीक्षा” । न्यायसू० वृत्तिः । आन्वीक्षिकीशब्दे विवृतिः ।

**ईक्षेण्य** त्रि० ईक्ष–बा० एन्य । ईक्षणीये दृश्ये “ईक्षेण्यासोऽह्योऽनः” ऋ० ६,७७,२ । “ईक्षेण्यासः ईक्षणीयाः” भा० ।

**ईख** गतौ इदित् भ्वा० पर० सक० सेट् । ईङ्खति ऐङ्खीत् । ईङ्खाम् बभूव आस चकार । ईङ्खिता ईङ्खिष्यति ऐङ्खिष्यत् । ईङ्खितः “सन्त्रासमितः शक्रः प्रैङ्खच्च क्षुभिता क्षितिः” भट्टिः “भुज्युं समुद्र आ रजसः पार ईङ्खितम्” १०,१४३,५ । णिचि ईङ्खयति । “य ईङ्खयन्ति पर्वतांस्तिरः समुद्रमर्णवम्” ऋ० १,१९,७ ।“इङ्खयन्तीरपस्युव इन्द्रं जातमुपासते” ऋ० १०,१५३,१ ।“इङ्खयन् परिजना पविद्धया रघुः ।

**ईङ्ग** गतौ इदित् इङ्गिवत् । ईङ्गति ऐङ्गीत् ईङ्गते इत्येके ।

**ईज** गतौ निन्दायाञ्च भ्वा० आत्म० सक० सेट् । ईजते ऐजत ऐजिष्ट ईजाम्–बभूव आस चक्रे । ईजिता ईजिष्यते ऐजिष्यत ।

**ईञ्ज** गतौ निन्दने च इदित् भ्वा० आत्म० सक० सेट् । ईञ्जते ऐञ्जिष्ट । ईञ्जाम्–बभूव आस चक्रे । ईञ्जितम् । अयम् अपाणिनीयः कविकल्पद्रुमे तु पठितः ।

**ईजान** त्रि० यज–ताच्छील्ये कानच् ह्लितम् । यजमाने यागशीले । “ततोमहद्भिः क्रतुभिरीजानो भरतस्तदा” भा० आ० ९४ अ० । “यः सेतुरीजानानामक्षरं ब्रह्म यत् परम्” कठो० ।

**ईड** स्तुतौ अदा० आत्म० सक० सेट् । ईट्टे ईडिषे ईडिढ्वे ऐडिष्ट ईडाम्–बभूव आस चक्रे । ईडिता ईडिष्यते ऐडिष्यत । ईड्यः ईडितः ईडनम् ईडा । “अग्निमीडे पुरोहितम्” ऋ० १,१,१ । डकारं लकारतया बह्वृचाः पठन्ति । “अज्मध्यस्थडकारञ्च लकारं बह्वृचा जगुः । अज्मध्यस्थढकारञ्च ळ्हकारं तु यथाक्रममिति” ऋ० भा० वाक्योक्तेः । वङ्गदेशसम्प्रदायस्तु तयोः अज्मध्यस्थयोः ड़ढ़कारतया पाठः इति भेदः । यास्कस्तु “ईडिरध्येषणकर्म्मा पूजाकर्म्मा चेत्याह “गन्धर्वाः सुरसङ्घाश्च बहवश्च महर्षयः । अन्तरीक्षं गतं देवं गीर्भिरग्र्याभिरीडिरे” रामा० “नेडिषे यदि काकुत्स्थम्” भट्टिः “ईड़ानो देवा इष्टानाम्” ऋ० १०,६६,१४ । “भवन्तमीड्यं भवतः पितेव” । “शालीनतामव्रजदीड्यमानः” इति च रघुः । “अग्निः पूर्व्वेभिर्ऋषिभिरीड्योनूतनैरुत” ऋ० १,१,२ । णिचि ईडयति ते ऐडिडत् त ।

**ईडा** स्त्री ईड़–भावे अ स्त्रीत्वात् टाप् । स्तुतौ ।

**ईडित** त्रि० ईड–क्त । स्तुते यस्य स्तवः कृतस्तस्मिन् ।

**ईडेन्य** त्रि० ईड–बा० एन्य । १स्तवनीये २पूजनीये च । “ईडेन्यो नमस्यस्तिरस्तमांसि दर्शतः” ऋ० १,१४६,७ ।

**ईतमत्** त्रि० ईट् अस्त्यस्य मतुप् स्त्रियां ङीप् । सनाथे ईश्ववति । ईशमन्तमाचष्टे णिच् मतोर्लुक् । ईशयति ।

**ईति** पु० ईयते ई–क्तिच् । १डिम्बे, २उत्पादिते त्रि० ३प्रवासे, “अतिवृष्टिरनावृष्टिः शलभाः मूषिकाः खगाः । प्रत्यासन्नाश्च राजानः षडेताईतयः स्मृता” इत्युक्ते ४क्षेत्रोपद्रवभेदे च स्त्री । “निरीतिभावं गमितेऽतिवृष्टयः” नैष० “निरातङ्कानिरीतयः” रघुः “ईतयोव्याधयस्तन्द्रीर्दोषाः क्रोधादयस्तथा । उपद्रवाश्च वर्तन्ते आधयः क्षुद्भयं तथा” भा० व० १४९ अ० ।

**ईदृक्ष** त्रि० अयमिव पश्यति इदम्+दृश–कर्मकर्त्तरि क्स इशादेशः दीर्घः । ईदृशे एतद्रूपदर्शने एवंविधे । “ईदृक्षास एतादृक्षास ऊ षु णः सदृक्षासः” वाजसने० १७,८ ।

**ईदृश्** त्रि० अयमिव पश्यति इदम्+दृश–कर्मकर्त्तरि–क्विन् इशादेशः दीर्घः । १एतादृशदर्शनवति एवंविधे “ईदृङ् चान्यादृङ् च सदृङ् च प्रति सदृङ्” यजु० १७,८१ । “इमं पुरोडाशं गृहीत्वा पश्यतीति ईदृङ् वेददी० व्याख्यानात् २तदर्थेऽपि । तस्य भावः त्व ईदृक्त्वं तद्भावे न० तल् । ईदृक्ता तस्य भावे स्त्री । “विष्णोरिवास्यानवधारणीयमीदृक्तया रूपमियत्तया वा” रघुः ।